# श्रीरामकृष्ण स्तवराजः

ओङ्कारवेद्यः पुरूषः पुराणो बुद्धेश्च साक्षी निखिलस्य जन्तोः।
यो वेत्ति सर्वं न् च यस्य वेत्ता परमात्मरूपो भुवि रामकृष्णः॥

मोक्षस्वरूपं तव धाम नित्यं यथा तदाप्नोति विशुद्धचित्तः।
तथोपदेष्टाखिलतत्त्ववेत्ता त्वं विश्वधाता भुवि रामकृष्णः॥

तेजोमयं दर्शयसि स्वरूपं कोषान्तरस्थं परमार्थतत्त्वं।
संस्पर्शमात्रेण नृणां समाधिं विधाय सद्यो भुवि रामकृष्णः॥

रागादिशून्यां तव सौम्यमूर्तिं दृष्ट्वा पुनश्चात्र न जन्मभाजः।
स्थाने यदादाय विशुद्धसत्त्वं इहावतीर्णो भुवि रामकृष्णः॥

नाकादिलोकं सुखदं च दिव्यं सुरम्यमैश्वर्यमहं न याचे।
हृदासने त्वं कृपया सदा वै वसेति याचे भुवि रामकृष्णः॥

यं ब्रह्मविष्णू गिरिशश्च देवा ध्यायन्ति गायन्ति नमन्ति नित्यम्।
तैः प्रार्थितस्तस्य परावतारो द्विबाहुधारी भुवि रामकृष्णः॥

वन्दे जगद्बीजमखण्डमेकं वन्दे सुरैः सेवितपादपीठम्।
वन्दे भवेशं भवरोगवैद्यं त्वमेव वन्दे भुवि रामकृष्णम्॥